# Shri Namashshiva Ashtakam

# શ્રીનમશ્શિવાષ્ટકમ્ ૨

## Document Information

Text title : Shri Namashshiva Ashtakam 02 25

File name : namashshivAShTakam2.itx

Category : shiva, aShTaka

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-25

Latest update : July 25, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 25, 2021

*sanskritdocuments.org*

# શ્રીનમશ્શિવાષ્ટકમ્ ૨

આદ્યાય સર્વજગતામખિલેષ્ટદાય
    નિત્યાય નિર્જિતસુરાસુરવૈભવાય ।
કુન્દેન્દુગૌરવપુષે કુસુમાસ્ત્રહન્ત્રે
    દેવાય ભક્તવરદાય નમઃ શિવાય ॥ ૧॥

ગઙ્ગાધરાય ગરુડધ્વજવન્દિતાય
    ગૌરીસખાય કરુણામૃતસાગરાય ।
ઉદ્ઘાતને (?) કુસુમકર્બુરકન્ધરાય
    પૂર્ણાય પુષ્કરકચાય નમઃ શિવાય ॥ ૨॥

સંસારસાગરસમુત્તરણપ્લવાય
    સોમાનલાર્કનયનાય સુરાર્ચિતાય ।
દુષ્કર્મઘર્મજલદાય દુરાસદાય
    દુષ્ટાત્મનાં પુરહરાય નમઃ શિવાય ॥ ૩॥

વેદાય વેદનિલયાય વિદાં વરાય
    વિજ્ઞાનમાત્રવપુષે વિવિધાત્મકાય ।
યજ્ઞાન્તકાય યજતામભયપ્રદાય
    યજ્ઞાર્ચિતાય ગિરિશાય નમઃ શિવાય ॥ ૪॥

યન્નામ જન્તુરવશોઽપિ ગૃણન્ કદાચિત્
    યામીં ન યાતિ ભયદામિહ યાતનાલિમ્ ।
તસ્મૈ જરામરણજન્મભયાતિગાય
    ગન્ધર્વગીતયશસેઽસ્તુ નમઃ શિવાય ॥ ૫॥

નાન્તં ચ મધ્યમથવાદિમજઃ સ ચાહં
    વિષ્ણુસ્તથૈવ યમિતેન્દ્રિયચેતસોઽપિ ।
જાનન્તિ સન્મુનિવરાશ્ચ તથામરેશાઃ
    ગન્ધર્વગીતયશસેઽસ્તુ નમઃ શિવાય ॥ ૬॥

ભૂતેશ્વરાય ભુજગેન્દ્રવિભૂષણાય
    ભૂતિત્રયાય ભુવનાધિપવન્દિતાય ।
પીતામ્બરપ્રિયસખાય પિનાકદોષ્ણે
    નાનાવિચિત્રગતયેઽસ્તુ નમઃ શિવાય ॥ ૭॥

રુદ્રાય ભદ્રચરિતાય મહોક્ષગાય
    શૂલાભયાનિ મૃગચર્મપરાઙ્કુશાય (?) ।
પાદાનતાર્તિદલનાય પલાશિહન્ત્રે
    મૃત્યુઞ્જયાય વિજયાય નમઃ શિવાય ॥ ૮॥

॥ ઇતિ શ્રીનમશ્શિવાષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by Aruna Narayanan

---

*Shri Namashshiva Ashtakam*

pdf was typeset on July 25, 2021

Please send corrections to *sanskrit@cheerful.com*